गरुड़स्तु स्वयं वक्ता यत्तद् गारुड़संज्ञकम् ॥
ब्रह्माण्डचरितोक्तत्वाद् ब्रह्माण्डं परिकीर्त्तितम् ॥"

अत्र क्वचिद्वक्तृसम्बन्धः क्वचिच्छ्रोतृसम्बन्धः क्वचित्प्रतिपाद्यमुख्यदेवताचरितसम्बन्धः। प्रवृत्तिनिमित्तमिति स्पष्टमेव दर्शितम्। तत्र भागवतनाम्नो निर्व्वचनवाक्यमेतत्।

"भगवत्याश्च दुर्गायाश्चरितं यत्र विद्यते।
तत्तु भागवतं प्रोक्तं न तु देवीपुराणकम् ॥"

अनेन च वाक्येन भगवत्या इदं भागवतमिति व्युत्पत्त्या ग्रन्थप्रतिपाद्यमुख्यदेवताचरितसम्बन्धः। प्रवृत्तिनिमित्तमिति स्पष्टमेव दर्शितम्। का सा भगवतीत्यपेक्षायामाह दुर्गाया इति। तत्तु भागवतं तु शब्दो निश्चयार्थकः। तदेव भागवतपदवाच्यं प्रोक्तमित्यर्थः। न तु पुराणान्तरमतप्राप्तं विष्णुभागवतं महापुराणान्तर्गतं भागवतमित्यर्थं इति शैवपुराणेन स्वमतं प्रदर्शितम्। कश्चिदेतत् पुराणान्तरमतेन उपपुराणं जानीयात्तत्राह न तु देवीपुराणकमिति। पुराणकमित्यत्र कप्रत्ययोऽल्पार्थकः। अल्पे इति सूत्रात् पुराणकमल्पं पुराणमिति यावत्। देव्याः पुराणकं देवीपुराणकम्। यदिदमुक्तं तद्देव्या उपपुराणं नैवास्तीत्यर्थः। अनेन च वाक्येनान्यस्य महापुराणत्वनिषेधेन स्वाभिप्रेतस्य च उपपुराणत्वनिषेधेन श्रीमद्देवीभागवतस्यैव महापुराणत्वं बोधयति व्यासः। मुख्यत्वेन भगवतीचरितप्रतिपादकस्य महापुराणमध्ये कस्यचित् पुराणस्यान्यस्याभावात्। ननु नारदादिपुराणवचनबलात् विष्णुभागवतस्य महापुराणान्तर्गतत्वे निर्व्विघ्नं निश्चिते तद्बलात् भागवतद्वयस्य मतभेदेन महापुराणत्वकल्पनापेक्षया यत्किञ्चित् भगवतीचरितस्यास्मिन्वचने ग्रहणेनानेन वचनेन विष्णुभागवतनाम्न एव निरुक्तिः कृतेति कुतो न कल्प्यते। वर्त्तते च विष्णुभागवते दशमस्कन्धे किञ्चिद्विन्ध्यवासिन्याश्चरितमिति चेन्न। तथा सति मुनेर्विष्णुभागवतविषय एव तात्पर्य्यसत्त्वे भगवत इदं भागवतमित्येव व्युत्पत्तिं कुर्य्यान्नहि केनचिन्मुनेः शिरसि भारः स्थापितो यत् स्वाभिप्रेतां युक्तियुक्तां निरुक्तिं त्यक्त्वा निष्प्रयोजनोऽनभिप्रेतां निरुक्तिं करोति। किञ्च सर्व्वत्रैतद्वचनप्रकरणे

"यत्र पूर्व्वोत्तरे खण्डे शिवस्य चरितं बहु।
शैवमेतत् पुराणं हि पुराणज्ञा वदन्ति च ॥"

इति बहुवचनैर्बहुचरितमुख्यचरितसम्बन्धरूपप्रवृत्तिनिमित्तस्यैवाभिप्रेतत्वं मुनेरवसीयते। मतभेदेन पुराणभेदकल्पना तु नात्रैव नवीनास्ति। पूर्व्वोक्तयुक्त्या नारदशैववायव्यादित्यपुराणेष्वन्यत्रापि सत्त्वात्। अस्तु वा गौरवं नहि तद्भयात् मुनेस्तात्पर्य्यमन्यथाकर्त्तुं कश्चिदीष्टे। तस्मात् पूर्व्वोक्तं तात्पर्य्यं विहायान्यतात्पर्य्येणान्यार्थकरणं महासाहसमेव। ननु लक्षणवाक्यमेतत्। ततश्च दुर्गाचरितं यत्र वर्त्तते तद्भागवतमित्यर्थः। तच्च न देवीभागवतं भवितुमर्हति। तस्य तल्लक्षणलक्ष्यत्वे न तु देवीपुराणकमिति निषेधविषयत्वेन निषेधविध्योः समानविषयत्वापत्तेः। किन्तु विष्णुभागवतमेव। ननु तथाप्येतल्लक्षणमन्यपुराणेष्वतिप्रसक्तमिति चेन्न। यथा वृत्रासुरवधलक्षणमन्यपुराणेषु प्रसक्तमपि यथा लक्षणत्वेन गृहीतम्। तद्वदत्रापि सत्त्वादिति चेन्न। पूर्व्वोक्तनिरुक्तिवचनप्रकरणस्थत्वविरोधात्। किञ्च लक्षणवाक्यमेतदितिपक्षेऽप्येतस्य लक्षणस्य महापुराणोद्देशेनैव सत्त्वादुपपुराणेष्वस्य प्रसक्त्यभावाद्देवीपुराणकालिकापुराणयोरुपपुराणत्वस्य निश्चितत्वात् तत्रैतल्लक्षणस्य प्रसक्तिरेव नास्तीति न तु देवीपुराणकमिति निषेधो व्यर्थ एव स्यात्। तस्मादेव तद्वचनस्य पूर्व्वोक्त एवार्थः। किञ्च लक्षणवाक्यमेतदिति पक्षे यत् किञ्चिच्चरितं गृह्यते उत यावच्चरितम्। यत्किञ्चिच्चरितस्य सर्व्वमहापुराणेषु सत्त्वाद्देवीपुराणमात्रनिषेधेन न निर्व्वाहः। तस्माद्देवीपुराणस्यैव निषेधस्वारस्याद्यावच्चरितं मुख्यत्वेन भगवतीचरित्रमेव ग्राह्यम्। तदा तव नाभीष्टार्थसिद्धिः। मुख्यत्वेन विष्णुभागवते दुर्गाचरितस्याभावान्ममैव त्वभीष्टार्थसिद्धिः। निषेधविध्योः समानविषयकत्वरूपं दूषणन्तु नैव सम्भवति। प्रकरणबलात् तात्पर्य्ये निश्चिते तद्विषयं विहायैव निषेधप्रवृत्तेः। वृत्रासुरवधोपेतत्वलक्षणं तु गायत्र्यारम्भविशिष्टमिति न तदतिप्रसक्तं तस्मात् पूर्व्वोक्त एव तद्वचनार्थ इति तद्वचनाद्देवीभागवतं महापुराणं न तु विष्णुभागवतमिति शिवपुराणमतम्। अत्र च नियमद्वयस्य पूर्व्वोक्तस्य सत्त्वाद्विष्णुभागवतविषये तथा नियमद्वयाभावादिदं शिवपुराणमतमेव मुख्यमन्यपुराणमतं त्वेकदेशीति नियमद्वयप्रदर्शकव्यासवाक्येन स्पष्टमेव बोधितमिति सुधियो विभावयन्तु। किञ्च।

"शैवमादिपुराणञ्च देवीभागवतं तथा।"

इति पाद्मवचनसंवादितया,—

"नवरात्रे तु देवेशि! दौर्गं भागवतं पठेत्।
जपेत् सप्तशतीं चण्डीं नियमेन समाहितः ॥"

इति दुर्गातरङ्गिणीधृतयामलवचनेन तथा,—

"देवीभागवतं नित्यं पठेद्भक्त्या समाहितः।
नवरात्रे विशेषेण श्रीदेवीप्रीतये मुदा ॥"

इति महेशठक्कुरकृतदुर्गाप्रदीपधृतदेवीयामलवचनेन च सप्रमाणस्य देवीभागवतस्य सर्व्वोपपुराणमध्ये एव निवेशात्।

"तत्र भागवतं पुण्यं पञ्चमं वेदसम्मितम्।"

इति प्रथमस्कन्धस्थस्य महापुराणेषु पञ्चममिदं पुराणमित्यर्थकस्य देवीभागवतोक्तवचनस्य निरालम्बनत्वादप्रामाण्यापत्तेः। मन्मते तु तस्य विषयलाभान्नाप्रामाण्यं तद्वचनप्रामाण्यादपि देवीभागवतमेव महापुराणमिति। किञ्च हेमाद्रौ कालिकापुराणे।

"यदिदं कालिकाख्यं तन्मूलं भागवतं स्मृतम्।"

इति वचनं तदपि देवीभागवतस्यैव महापुराणत्वं बोधयति। तथाहि।

"अष्टादशभ्यस्तु पृथक् पुराणं यत् प्रदृश्यते।
विजानीध्वं द्विजश्रेष्ठास्तथा तेभ्यो विनिर्गतम् ॥"

इति मात्स्यवचनेनोपपुराणानां महापुराणमूलकत्वनियमादिदं कालिकापुराणं किम्पुराणमूलकमित्याकाङ्क्षायां तस्यानिवर्त्तकमिदं वाक्यं यदिदं कालिकाख्यं पुराणं तन्मूलं तस्य मूलं भागवतं विदुरिति हि तस्यार्थो निबन्धकारैर्दर्शितः। यथान्यान्युपपुराणान्येकैकस्मान्महापुराणान्निर्गतानि तद्वदिदं भागवतादुत्पन्नमिति यावत्। तच्च भागवतं न वैष्णवं तन्मूलं भवितुमर्हति। देव्युपपुराणस्य देवीपुराणमूलकत्वे एव सामञ्जस्यात्। शैवोपपुराणानां शैवेभ्य एव वैष्णवोपपुराणानां वैष्णवेभ्य एवोत्पत्तिदर्शनादिति देवीभागवतमेव तन्मूलमिति तस्य महापुराणत्वं सिद्धम्। यत्र तु क्वचित् क्वचित् महापुराणमूलकत्वमप्रसिद्धं तत्र यथायोग्यमनुमेयमिति। किञ्चादित्यपुराणदृष्ट्यापि देवीभागवतमेव महापुराणम्। तथाहि आदित्यपुराणे रक्तासुरवधप्रस्तावे।

"या जघ्ने महिषं दैत्यं क्रूरं वृत्रासुरं तथा।
साद्य रक्तासुरं हत्वा स्वाराज्यं ते प्रदास्यति ॥"

इति वचनम्। अनेन वचनेन देवीभागवते स्वसम्मतिर्दर्शिता। न हि देवीभागवतातिरिक्तसर्व्वपुराणेषु देवीकृतो वृत्रासुरवधः क्वचिदप्यस्ति। इन्द्रकृतस्यैव तस्य सत्त्वात् केवलं देवीभागवत एव देवीकृतः सोऽस्ति। तद्ग्रहणेन तु देवीभागवते स्वसम्मतिर्दर्शितेति युक्तमेव। अनन्तरञ्च तत्रैव पुराणदानप्रस्तावे।

"ददाति सूर्य्यभक्ताय यस्तु भागवतं द्विजाः।
सर्व्वपापविनिर्मुक्तः सर्व्वव्याधिविवर्ज्जितः ॥
जीवेद्वर्षशतं साग्रमन्ते वैवस्वतं पदम् ॥"

इति पठितम् ॥

अत्र च स्वसम्मतं भागवतमेव ग्रहीतुमुचितम्। किञ्चेदं वचनं देवीभागवतपक्षे एव स्वरसतः सङ्गच्छते। प्रथमश्लोके एकादशद्वादशस्कन्धयोश्च सविस्तरं गायत्रीविधानसहस्रनामादेः कथनात् सूर्य्यस्य गायत्रीदेवतात्वात्। तद्भागवतपक्षे तु वैकुण्ठं गच्छेदित्येव वदेदिति। किञ्च

"यत्राधिकृत्य गायत्रीं वर्ण्यते धर्म्मविस्तरः।
वृत्रासुरवधोपेतं तद्भागवतमिष्यते ॥"

इति मात्स्यवचनमपि देवीभागवतस्यैव महापुराणत्वं बोधयति। वेदे त्रिपदा गायत्रीति गायत्रीलक्षणं श्रूयते। तेन च त्रिपाच्छन्दोऽधिकृत्य यत्र धर्म्मविस्तरो वर्ण्यते तद्भागवतमिति तदर्थः। त्रिपाच्छन्दश्च देवीभागवते प्रथमश्लोके।

"सर्व्वचैतन्यरूपां तामाद्यां विद्याञ्च धीमहि।
बुद्धिं या नः प्रचोदयात् ॥" इति श्रूयते।